॥ শিৱষডক্ষর স্তোত্রম ॥

ॐকারং বিংদুসংযুক্তং নিত্যং ধ্যাযংতি যোগিনঃ ।
কামদং মোক্ষদং চৈৱ ॐকারায নমো নমঃ ॥ ১॥
নমংতি ঋষযো দেৱা নমন্ত্যপ্সরসাং গণাঃ ।
নরা নমংতি দেৱেশং নকারায নমো নমঃ ॥ ২॥
মহাদেৱং মহাত্মানং মহাধ্যানং পরাযণম ।
মহাপাপহরং দেৱং মকারায নমো নমঃ ॥ ৩॥
শিৱং শাংতং জগন্নাথং লোকানুগ্রহকারকম ।
শিৱমেকপদং নিত্যং শিকারায নমো নমঃ ॥ ৪॥
ৱাহনং ৱৃষভো যস্য ৱাসুকিঃ কংঠভূষণম ।
ৱামে শক্তিধরং ৱেদং ৱকারায নমো নমঃ ॥ ৫॥
যত্র তত্র স্থিতো দেৱঃ সর্ৱৱ্যাপী মহেশ্ৱরঃ ।
যো গুরুঃ সর্ৱদেৱানাং যকারায নমো নমঃ ॥ ৬॥
ষডক্ষরমিদং স্তোত্রং যঃ পঠেচ্ছিৱসংনিধৌ ।
শিৱলোকমৱাপ্নোতি শিৱেন সহ মোদতে ॥ ৭॥
॥ ইতি শ্রী রুদ্রযামলে উমামহেশ্ৱরসংৱাদে
ষডক্ষরস্তোত্রং সংপূরণম ॥

---

Please send corrections to sanskrit@cheerful.com